Lesson-12 Part-1

तीर्थ यात्रा

Introduction: This lesson is a continuation of events in lesson-11.The sequence of case endings and tenses is also continued. The novelty here is to introduce the student to usages of terms typical of ancient Indian culture.

हरिद्वार् रेल् निलये

Scene at the Haridwar Railway Station.

उषा - ननु , संप्रति किं करिष्यामः? कुत्र तावत् गच्छामः?
कमपि होटलं वा साधूनां आश्रमं गच्छामः ?
So, what should we do now? Where do we go?
To a Hotel or an Ashram of the Saints?

शङ्करः - न उभयं । मम कार्यालस्य विश्रान्तिगृहं
अत्र गङ्गाकूले अस्ति ।
मुनीकि रेति इति स्थाने अस्ति ।
वस्तु तः गिरिमार्गे एव अस्ति ।
अस्माकं प्रकोष्ठानि तत्र आरक्षितानि ।

Neither, my company has a rest house on the banks of the Ganges, at a place called Muni ki Reti. In fact, it is on the way to the mountains. Our rooms are reserved there.

मोहन् - वाजिशकटेन गच्छामः ?
Shall we go by horse cart?

शङ्करः - आं

Yes.

ते विश्रान्ति गृहं प्राप्नुवन्ति - They reach the rest house.
विश्रान्ति गृहे - At the rest house.

निर्वाहकः - आईये साहब् आप् मदरास् से आ रहे हैं न ?
आप का नाम क्या शङ्कर्जी है ?
Caretaker- Please come Sir. Aren’t you coming from Madras and aren’t you Shankarji ?

उमा - एषः किं वदति ? न किञ्चित् अवगच्छामि ।

Uma - What is he saying? I don't understand anything.

शङ्करः - अहमपि (or मम अपि)
त्वं आङ्ग्लभाषां जानासि वा ?

Shankar - I too (don't understand)
Do you know English ? (this is addressed to the caretaker)

निर्वाहकः - साब् " मी नो इङ्ग्लीष् " हिन्दी ओन्लि ।

caretaker - Saab, " me no english " Hindi only .

शङ्करः - अधुना किं करिष्यामः ?

Shankar - What shall we do now?

पितामहः - हां ख हं मद्रास् से आ रहे हैं ।
हमारे रहने के लिये बन्दोबस्त्
किया हुआ है क्या ?

Grandfather- Yes, we are coming from Madras.
Has any arrangement been made for our stay here?

निर्वाहकः - बाबाजि, आप के लिये सब तय्यार् है ।
आप अच्छी हिन्दी बोल्ते हैं। आईये ।

Caretaker- Father, everything is ready for you. You speak good Hindi. Please come.

उमा, शङ्करः - तात, भवान् कथं हिन्दी भाषां वदति ?
कदा कुत्र अपठत् ?

Uma, Shankar - Father,how are you able to speak Hindi?
When and where did you learn ?

पितामहः - किं मन्यसे ? वयं वृद्धाः किञ्चित् न जानीमः
इति विचारयति वा ?
पूर्वं वयं यदा युवानः आस्म , तदा सर्वे हिन्दी
भाषां राष्ट्रभाषा इति विचार्य कौतूहलेन पठितवन्तः ।

Grandfather- What do you think? We old people do not know anything- Is that what you think ?
When we were young, we learnt Hindi happily

with the feeling that it is the national language.

-----------------------------------------------------------------------

Lesson-12 Part-2

गङ्गायां - Scene at the banks of the Ganges.

मोहन् - आ ..... शैत्येन जडी भवति ,

अस्मिन् जले कथं निमज्जामः ?

Ah! it is freezing cold. How do we take a dip?

उमा - न केवलं शैत्यं , प्रवाहस्य अपि अतीव वेगः अस्ति ।

जलं प्रष्टुमपि भीतोऽस्मि , कुतो वा प्रवेशः ?

Not only is it freezing but the flow is so fast.
I am afraid even to touch the water.
Where is the question of dipping?

शङ्करः - वृथा प्रलापं मा कुरु । सर्वे आगच्छन्तु ।

वयं एकैकस्य हस्तं परस्परं

गृहीत्वा जले प्रविशामः ।

सकृत् मज्जनात् परं शैत्यं न अनुभवेम (or अनुभवामः)

Come on, give no excuses. Come everybody, we will hold each other's hands and enter the water. Once we dip we shall no longer feel cold.

परस्मिन् दिने प्रातःकाले - Next Morning.

ते ऋषीकेशं गच्छन्ति, केदारनाथस्य एवं बदरीनाथस्य मार्गे ।

तत्र लक्ष्मणदोलां पश्यन्ति । बालौ लक्ष्मणसेतोरुपरि क्रीडतः ।

गङ्गायाः उत्तर तटे कांश्चन आश्रमान् अवलोकयन्ति ।

ते तत्र गङ्गायां स्नानं कुर्वन्ति ।

पूर्वं दिनं तत्र शान्तियुक्तां ध्यानमग्नां गङ्गां दृष्ट्वा

आश्चर्यचकिताः अभवन् ।

They reach Rishikesh enroute Kedaranath and Badrinath. They see the Lakshmana Joola (wooden suspension bridge) across the Ganges (believed to have been first built by Lakshmana). The children play on the bridge. They see some of the ashrams on the other bank of the Ganges. They have their bath there in the Ganges. Looking at the Ganges which is peaceful and pensive in comparison with the previous day's (Ganga at Hardwar), they are wonderstruck.

तत् दिने सायङ्काले । Same Day, in the evening.

शङ्करः - श्वः प्रभाते वयं हिमालयपर्वतस्योपरि आरोहामः ।
हिमालयस्य एष भागः तिह्री गड्वाल् इति ख्यातः ।
वयं एकेन विस्तृत कार्यानेन भाटकं दत्वा गमिष्यामः ।
एवं मार्गे कतिपय मुख्यस्थानानि एवं देवालयान् द्रक्ष्यामः ।
प्रथमतया बदरीनाथं प्रति गमिष्यामः ।

We will ascend the Himalaya Parvata tomorrow morning.
This part of the Himalayas is called Tehri Garhwal.
We shall hire a van and proceed so that we can see some important places and temples on our way.
First, we shall go to Badrinath.

पितामहः - नैवं (न एवं) । नियमस्तु केदारनाथं दृष्ट्वा एव बदरीनाथं प्रति गन्तव्यं इति । वस्तुतस्तु पुरा तीर्थयात्रिकाः प्रथमं यमुनोत्तरीं दृष्ट्वा , ततः गङ्गोत्तरीं प्रति गत्वा, ततः केदारबदरी यात्रां प्रकुर्वन्ति ।

No, not that way. The rule is that one should see Kedaranath first and then go to Badrinath.
Actually, in the olden days, pilgrims would first see Yamunottari, then to Gangottari and thereafter proceed to Kedar and Badri.

या श्रीकृष्णस्य प्रिया नदी यमुना कालिन्दी इत्यपि गीयते, सा यमुनोत्तरीतः प्रभवन्ति ।

The river Yamuna, the darling of SriKrishna which is also called Kalinidi, starts from Yamunottari.

गङ्गानदी तु गङ्गोत्तरीतः न प्रादुर्भवति ।
परन्तु तत् स्थानात् प्रायः
एक योजन दूरे गोमुखं इति स्थानात् ,
प्रथमतया दृष्टिगोचरं आयाति ।
ततः गङ्गोत्तरीं प्रति प्रवहति । गोमुखस्य मार्गः अतिक्लिष्टः ।
तस्मात् प्रायशः सर्वे गङ्गोत्तरी पर्यन्तमेव गच्छन्ति ।

Ganga actually does not start at Gangottari, but she comes into sight at a place called Gomukh about ten miles from there. From there she flows towards Gangottari. The way

to Gomukh is very difficult. So most people go only
upto Gangottari.

उषा , मोहन् - तात तात कथं गोमुखं इति नाम ?
Grandfather, Why the name Gomukh?

पितामहः - यस्मात् गङ्गायाः निर्गमद्वारं गोमुखसदृशं भवति ,
तस्मात् एवं नाम ।

It is because the source sprout of Ganga appears like
the face of a cow. So the name.

उषा , मोहन् - ततः एव गङ्गा प्रभवति वा ?
Does Ganga start from there?

पितामहः - न , कुतः सा आगच्छति इति न कोऽपि जानाति ।
गोमुखात् पूर्वं सा अदृश्या भूत्वा
अतिदूरात् आगच्छति इति
अस्माभिः श्रुतम् ।

No, Nobody knows where she comes from. We have
heard that she comes from very far away before Gomukh
but is invisible.

शङ्करः - एवं चेत् केदारनाथं प्रति एव प्रथमं गमिष्यामः ।

If so, let us go to Kedaranath first.

---------------------------------------------------------------------

Lesson-12 Part-3

उमा - आ , अत्रैव एवं शैत्यं चेत् , उपरि कीदृशं भवेत् ?
Ah! it is so cold here itself. How will it be above?

मोहन् - गमिष्यमाणानां स्थानानां कियत् उन्नतिः स्यात् ?
What will be the height of the places we intend visiting?

शङ्करः - नूनं अयुतादपि अधिकमेव फीट् स्यात् ।

Indeed, it will be more than ten thousand feet.

तत्र निश्चयेन अतिशैत्यं भवति एव। एवं वयं
शैत्येन कंपेमहि ।

It will certainly be very cold. We shall shiver in the cold.

उषा - एवं चेत् इतोऽपि कंबलानि ओर्णवस्त्राणि च नेतव्यानि खलु ?
If so, should more blankets and woolen clothing be taken?

शङ्करः - सर्वत्र कंबलाः लभ्यन्ते । परन्तु अस्माकं ओर्णवस्त्राणि नेतव्यानि एव ।

Blankets will be available everywhere but we have to take woolen clothing.

परस्मिन् प्रभाते Next Morning

पितामहः - स्नानानन्तरमेव गच्छामः वा ?

Do we go after our baths?

मोहन् , उषा - कदापि न । किं अत्रैव हिमशिलायितुं इच्छति वा ?

No way, do you wish to freeze (into ice) here itself?

पितामहः - स्नानं विना कथं गच्छामः ? पथि स्नानार्थं सौकर्यं अस्ति न वा इति न जानीमः । श्रान्ताः भविष्यामः प्रयाणेन ।

How can we go without a bath? We do not know if there are facilites for bathing enroute. We will become tired after traveling.

शङ्करः - चिन्तामास्तु । षष्टिः कि मी दूरे देवप्रयागः इति स्थले विश्राम्यामः । तत्र स्नात्वा अल्पाहारं कृत्वा पुनः प्रयामः ।

Don't worry. sixty KM from here we will rest at a place called Devaprayag. There, after our baths and breakfast, we can proceed.

पितामहः - बाढम्

OK.

ते गङ्गयाः सह किञ्चित् दूरं गच्छन्ति । मध्ये नदी नयनपथात् अपगच्छति । ततोऽपि किञ्चित् दूरे देवप्रयाग स्थलं प्राप्नुवन्ति ।

They go along the Ganges for some distance. Midway, the river disappears from sight. After some distance, they reach Devaprayag.

मोहन् - उषे , पश्य , अत्रापि एका लक्ष्मणदोला अस्ति ।
क्रीडावः , आगच्छ ।

Usha, see, here too there is a Lakshmana Joola.
Let us play, come.

शङ्करः - एतादृशी दोलाः बह्व्यः सन्ति ।
या ऋषीकेशे स्थिता सा एव
लक्ष्मणझूला इति उच्यते ।

There are many such bridges. The one in Rishikesh alone is called Lakshmana Joola.

ते द्वयोः नद्योः सङ्गमं प्राप्नुवन्ति ।

They reach the confluence of the two rivers.

शङ्करः - सकृत् अत्र स्नानं कुर्मः ।एषा तु गङ्गा एव , सा का ?
First, let us bathe here.
This is Ganges but which is the other?

पितामहः - अत्र गङ्गालकनन्दयोः सङ्गमः ।
निकटे एव रघुनाथस्य मन्दिरं
भवितुं अर्हति ।

Here, it is the confluence of the Ganga and Alakananda.
There should be the temple of Raghunatha close by.

उषा - तात तात , मम विचारः तु प्रयागः मध्यभारते अलहाबाद्
नगरस्य समीपे वर्तते इति । कथं अत्रापि प्रयागः भवति ?
Grandfather, I thought that Prayag was in Central India
near Allahabad city. How is it there is a Prayag here too?

पितामहः - शृणु , यत्र यत्र द्वयोः सरितोः सङ्गमः भवति ,
तत्र तत्र प्रयाग इति नाम ।

Listen, wherever there is a confluence of two rivers,
it is called Prayag.

अस्माकं पथि अन्येऽपि बहवः प्रयागाः सन्ति ।
प्रतिसङ्गमं तृतीया एका अन्तर्वाहिनी नदी अस्ति
इति हिन्दवः विश्वसन्ति ।

On our way, there will be many more Prayagas. The
Hindus believe that at every Prayag, there is a third
river underground, but it is not visible to the eye.

So, in reality, threre are three rivers.

परन्तु चक्षुर्गोचरं न भवति । तस्मात् वस्तुतया तिस्रः नद्यः एव सन्ति ।

अलहाबाद् नगरस्य समीपे प्रयागस्थले गङ्गायाः यमुनायाः एवं सरस्वत्याः सङ्गमो भवति ।

In the Prayag near Allahabad, there is the confluence of Ganga, Yamuna and Saraswathi.

------------------------------------------------------------------------

Lesson-12 Part -4

ते स्नानं कृत्वा रघुनाथस्य मंदिरं दृष्ट्वा पुनः प्रयाणे उन्मुखाः भवन्ति ।

They have their bath, see the Raghunatha temple and once again concentrate on their journey.

उमा - इदानीं कस्याः नद्याः मार्गं अनुसृत्य गच्छामः ? उभयी अपि मनोहरा ।

Now which river do we follow? Both are beautiful.

शङ्करः - अलकनन्दां अनुसृत्य गच्छामः ।

(or अलकनन्दायाः प्रवाहमनुगच्छामः) ।

We shall follow Alakananda.

इतः अलकनन्दायाः तीरे एव कार वीथी अस्ति ।

Only along the Alakananda there is a road.

गङ्गां प्रति गन्तुं इच्छा चेत् प्राग् एव तिहरी मार्गे गन्तव्यं आसीत् ।

If one decides to go along the Ganges, one should have taken the road to Tehri earlier.

ते श्रीनगरं प्राप्नुवन्ति ।
श्रीनगरः घड्वाल् प्रदेशस्य मध्ये एका अतिसुन्दरी द्रोणी ।
तत्र भोजनं स्वीकृतवन्तः ।

They reach Srinagar. Srinagar is a very beautiful valley in the Garhwal district. They have their lunch.

पितामहः - आलुकं , आलुकं , आलुकं - सर्वत्र आलुकं ।
आलुकं विना किमपि अस्ति वा ?

Potatoes, potatoes and potatoes everywhere. Is there anything without potatoes?

शङ्करः - दिष्ट्या एतावत् पर्यन्तं आलुकं अपि लभ्यते ।

By God's grace, at least we are getting potatoes.

इतःपरं तु एतदपि लभ्यते वा न वा, न जानीमः ।

From now on, whether even this will be available, we do not know.

केवलं चप्पात्ति एव लभ्यः ।

Only chappatti's will be available.

उमा - किमपि वा भवतु । तातस्य कृते किञ्चित् शुष्कफलानि एवं शुष्कानि खाद्यानि नीतवती । नक्ताहारार्थं कुत्र स्थानम् ?
Whatever may be, for Grandfather I have taken some dry fruits and dry eatables.

शङ्करः - रुद्रप्रयाग पर्यन्तं अद्य गच्छामः एवं तत्र रात्रौ वसामः इति मन्ये ।

ततः प्रभाते गच्छामः ।

We shall proceed upto Rudraprayag and halt there for the night I think, and proceed from there in the morning.

रुद्रप्रयागे At Rudraprayag

उषा - तात तात, अत्रापि द्वे नद्योः सङ्गच्छतः वा ?
Grandfather, two rivers join here too?

पितामहः - आं ।

Yes.

मोहन् - रुद्रप्रयागः ! हे भगवन् !
Rudraprayag. Oh, God!

मया तु श्रुतं अत्र नरभोजिनः व्याघ्राः बहवः सन्ति इति ।

I have heard that there are many man-eaters here.

एतत् मया जिम् कार्बेट् महोदयस्य मेन् ईटर्स् आफ कुमाऊन् पुस्तके पठितम् ।

I have heard that there are many man-eaters here. I read this in Jim Corbett's book 'Man eaters of Kumaon'.

शङ्करः - मा भैषीः । अत्र व्याघ्राः अपि न सन्ति,
सिंहाः अपि न सन्ति ,
केवलं अस्मादृशाः नराः सन्ति ।

Don’t be afraid. There are neither tigers here nor lions.
There are only people like us.

उषा, मोहन् - इन्दोः सौन्दर्यं पश्य ।

Look at the beauty of the moon.

तस्य हिमशिखरस्य उपरि प्रदृश्यते । अति रम्यं न ?
It is visible above that snow peak. Isn’t it charming?

शङ्करः - अत्र कियती शान्तिः ।
शिलासु जलप्रवाहस्य रवः एव एतत् प्रदेशस्य
प्रशान्तिं भञ्जयति ।

Oh! How peaceful it is here.
Only the sound of the water beating against the rocks,
breaks the silence of this place.

पितामहः - आं , परन्तु शीघ्रमेव वासस्थानं प्रति गन्तव्यं अस्ति ,
यत्र अग्नि समीपे उष्णी कर्तुं शक्नुमः ।

Yes, but we have to go to the rest house soon where
we can warm ourselves in the fire.

ते रुद्रप्रयागे एकं विश्रान्ति गृहं गच्छन्ति ।
ते पञ्च शैत्येन कंपमानाः आसन् येन शैत्येन ते अपरिचिताः ।

They go to the rest house at Rudraprayag. All the five
shiver in the cold as they are not used to it.

---------------------------------------------------------------------

Lesson-12 Part-5

परेध्युः Next morning.

पितामहः - अत्र अलकनन्दा मन्दाकिन्या सह सङ्गच्छति अतः
अत्र शिवविष्णोः सङ्गमः ।

Here Alakananda joins the Mandakini and so there
is a confluence of Shiva and Vishnu.

उषा - कथं ?

How?

पितामहः - मन्दाकिनी नदी केदारनाथात् क्षेत्रात् आगच्छति ।

The Mandakini river comes from Kedaranath
temple town.

अलकनन्दा बदरीनाथक्षेत्रात् आगच्छति एवं तयोः अत्र
मेलनं भवति ।

Alakananda comes from Badrinath and the two
join here.

पूर्वोक्तं क्षेत्रं भगवतः शिवस्य स्थानं । अपरं विष्णोः स्थानं ।

The former is the abode of God Shiva and the latter
that of Vishnu.

मया उक्तं किल यत्र यत्र द्वयोः नद्योः सङ्गमः , तत्र तत्र तृतीया
नदी अन्तर्वाहिनी रूपेण भवति । सा सरस्वती ब्रह्मरूपिणी ।

Have I not mentioned that wherever two rivers meet,
a third one flows as an undercurrent? That Sarawati is
of the nature of Brahma.

तस्मात् अत्र रुद्रप्रयागे हिन्दूनां प्रधानदेवत्रयं विराजते ।

So, here at Rudraprayag, the important trinity of the
Hindu Gods reside.

शङ्करः - इतः वयं मन्दाकिन्याः तीरं अनुसृत्य
केदारनाथपर्यन्तं गच्छामः ।

From here, we shall proceed along the Mandakini upto
Kedaranath.

सा कुत्रचित् अस्मत्समीपे प्रवहति , कदाचित् कतिपय
हस्तयुगशतैः निम्ने प्रवहति ।

At some places, she will flow near us and at places,
hundreds of yards, below us.

उमा - पश्य , पर्वतस्य अस्मिन् असौ पार्श्वः
द्रुमैरावृतः मरकतश्यामः भाति ।
किन्तु बदरीनाथस्य पार्श्वे शुष्कभूमिः एव दृश्यते ।

Look, this side of the mountain is full of trees and
appears green. On that side (towards Badrinath) it
looks barren.

किञ्चित् दूरं गत्वा After travelling some distance.

शङ्करः - पश्य त्रियुगीनारायणं जिगमिषुः अस्मिन्
पथि गन्तुं अर्हति ।

Look, those who want to proceed to Triyuginarayan should take this path.

मोहन् - त्रियुगीनारायणः इति किम् ?

What is Triyuginarayan?

पितामहः - अस्य पर्वतस्य शिखरे अहर्निशं
जाज्वल्यमानः अग्निः अस्ति ।

On the top of this peak, there is a fire burning day and night.

एषो अग्निः सदा ज्वलति एवं त्रेतायुगात्
आरभ्य निरन्तरं ज्वलति इति वदन्ति।

This fire burns always and is supposed to be burning right from Tretayuga.

ते गौरीकुण्डं प्राप्य तत्र रात्रिं उषित्वा परस्मिन् प्रभाते
यात्रां पुनः प्रारभन्ते ।

They reach Gowrikund and stay for the night there.
Next day, they start their trip again.

उमा - अत्र द्रष्टव्यं किमपि अस्ति वा ?
कथं अस्य गौरीकुण्डं इति नाम ?

Is there anything to see here? How did the name Gowri Kund arise?

पितामहः - आं , अत्र उष्णोदक कुण्डं अस्ति ।
अत्रैव भगवती पार्वती
तपः अतपत् शिवं परिणेतुम् ।

Yes, there is a hot water spring here. It is here that Goddess Parvati performed penance intending to marry Lord Shiva.

अत्र स्नात्वा जन्मान्तरे कृतानि पापानि नरः विनाशयति ।

Taking one’s bath here, one destroys all the sins committed in all one’s previous incarnations.

ते सर्वे उष्णीदकतीर्थे स्नानं कुर्वन्ति ।

They all have their baths in the hot water spring.

शङ्करः - इतः केदारनाथ पर्यन्तं सप्त कि मी दूरं
पद्भ्यां एव गम्यते ।
तात त्वदर्थं मया 'दण्डी' सुसज्जिता ।

From here one has to walk the seven KM distance to Kedaranath. Father, for you I have arranged a dandi.

पितामहः - तत् किम् ?
What is that?

शङ्करः - आसनं एकं द्वयोः कीचक दण्डयोः उपरि
बध्वा चतुर्भिः नरैः
स्कन्धेषु नीयते ।

A chair is bound to two bamboo poles and is carried on the shoulders by four men.

अश्वेन अपि गन्तुं शक्यते परन्तु तत् क्लेशाय भवति ।

One can go on horseback too but for father, it will be difficult.

उषे , मोहन् अश्वस्य उपरि गच्छसि वा ?
Usha, Mohan, do you want to go horeseback?

उषा, मोहन् - न , आवां पद्भ्यामेव गच्छावः ।

No, we shall walk.

---------------------------------------------------------------------

Lesson-12 Part-6

उषा , मोहन् एवं तातः केदारनाथं प्राप्य उमाशङ्करयोः
निमित्तम् प्रतीक्षणं कुर्वन्ति ।
किञ्चित् अनन्तरं शङ्करः अपि प्राप्नोति ।
बहुविलंबेन उमा क्लान्ता तत्र प्राप्नोति ।

Usha, Mohan and Grandfaher reach Kedarnath and wait for Shankar and Uma. A little later Shankar also reaches. Much later Uma arrives extremely tired.

शङ्करः - अन्ते त्वं प्राप्तवती ।
गौरीकुण्डं प्रतिनिवर्तितवती इति मया चिन्तितम् ।

At last you reached.
I thought you had returned to Gowrikund.

उमा - इदानीं त्वं मया सह क्रीडसि ।

You are jesting with me now (are you)?

अतिक्लान्ता पथि एव मरिष्यामि इति मया चिन्तितम् ।

किमर्थं केदारनाथः एवं क्लेशेन प्राप्यः ।

I am so tired that I thought I'd die on the way.
Why should Kedarnath be so difficult to reach?

पितामहः - उमे त्वं अद्य ईशवीये २००१ तमे संवत्सरे

आधुनिकसौविध्ययुक्ते

काले परिदेवनं करोषि ।

Uma, In A.D.2001, with all modern conveniences you are complaining.

आदिशङ्करभगवत्पादः पञ्चविंशति शत संवतसरेभ्यः प्रागेव

अत्र केवलं कार्पासवस्त्रद्वयेन्युक्ताः एवं कमण्डलुना

सह अत्र आगतवान् ।

Bhagavadpada Shankaracharya, attired just in two cotton clothes and his kamandalu had come here twentyfive centuries ago.

सः अस्य मन्दिरस्य जीर्णोद्धारणं कृत्वा पूजा पद्धतिं

स्थापयित्वा एवं पूजकस्यापि विधिं प्रतिष्ठापितवन्तः ।

After renovating the temple here, he established the system of worship and also the rules for the Pujari (priest).

तेन बदरीनाथक्षेत्रं अपि प्राप्तं एवं तत्र अलकनन्दायाः

हिमतोयस्य मध्यात् बदरीनाथस्य विग्रहः उध्दृतः ।

तेन तं विग्रहं मन्दिरे

प्रतिष्ठाप्य पूजायाः एवं पूजकस्य च विधिः निर्दिष्टः ।

He also went to Badrinath and acquired the idol of Badrinath from the ice cold waters of the Alakananda. He installed the idol in the temple and also laid down the rules for the worship and for the priest.

त्वं तु केवलं सप्त कि मी दूरं पद्भयां गत्वा तदपि

ओर्णवस्त्रैः आच्छाद्य एवं मार्गे चाक्लेट् अपि चर्वित्वा

विलपसि किल ?

You, having walked only seven KM, that too well protected in woolen clothing and chewing chocolates all the way, complain?

उमा - आचार्य भगवद्पादस्य विषये मम अपि सहमतिः एव ।

परन्तु , सः अस्मद्सदृशः साधारणः व्यक्तिः न आसीत् ।
भवान् कथं जानाति , कीदृशं कष्टं मया मार्गे अनुभूतम् ।

As far as Shankaracharya is concerned, I agree with you. But he was no ordinary person like us. How would you know the difficulties experienced by me on the way?

पितामहः - त्वं किं मन्यसे , अहं मेर्सिडेस् बेन्स द्वारा अत्र
आनीतः इति । एवं न ।
एतेषां प्रत्येकस्य चलनरीतिः पृथक् ।

What do you think? That I was brought here in a Mercedes Benz? It is not so. These four, each one had a different gait.

शिलाः लंघ्यमानाः कोणेषु परिवर्तमानाः मां उपरि
अधः पुनः पुनः प्रक्षिप्तवन्तः ।
मध्ये मध्ये अहं प्रवणे अधः पतिष्यामि इव भावना जाता ।
भोलानाथः एव केवलं मम रक्षकः आसीत् ।

While they avoided the rocks or negotiated bends, they threw me up and down again and again. I felt that I will fall down.

ते अवशिष्टे दिने विश्रान्तिं कृतवन्तः ।
एवं केदारनाथ क्षेत्रस्य अलौकिकीं
शान्तिं सौन्दर्यं च दृष्ट्वा विस्मितवन्तः ।
प्रभाते मन्दाकिन्यां स्नानं कृत्वा,
मन्दिरे केदारनाथं दृष्ट्वा पूजां कृतवन्तः ।
शङ्करः ब्रह्मकमलानि आनाय्य ईश्वरं न्यवेदयत् ।

They rest for the remaining part of the day. And they wondered looking at the divine place and beauty of Kedaranath. In the morning, they have their baths in the Mandakini and offer their prayers in the temple of Kedaranath. Shankar brings some Brahmakamal lotuses and offers them to the Lord.

उमा - किंस्वित् पुष्पं एतत् ? पद्मं इव भाति ?
What kind of flower is this? It looks like a lotus.

शङ्करः - एतत् ब्रह्मकमलं तरोरुपरि विकसति द्रष्टुं
कमलमिव आभाति ।
तस्मात् ब्रह्मकमलं इति नाम ।

अस्मिन् प्रदेशे लभ्यते ।

This is Brahmakamal. It blossoms on a tree and looks like a lotus. So it is called Brahmakamal. It is seen in this place (means that it grows prdeominantly in this region).

-------------------------------------------------------------------

Lesson-12 Part-7

पितामहः - उषे , मोहन् पश्य एतत् लिङ्गं स्वयंभु ।
अर्थात् स्वयमेव आविर्भूतं न मनुष्येण कृतम् ।

Usha, Mohan, look, this Linga is self made. Swayambhu, i.e., it came up on its own and is not man made.

उमा - कियती संतृप्तिः मनसः ! इतः निवर्तन चिन्तनमेव मनसः क्लेशाय ।

What satisfaction to the mind! Even to think of returning from here is painful.

पितामहः - सत्यं, परन्तु एतत् असहनीयं शैत्यम् ।
मध्याह्ने ऊर्णवस्त्रस्यापि
अन्तरे एवं कम्पमानं शरीरम् ।

True. But this unbearable cold. Even at noon one shivers within the woolen clothing.

शङ्करः - तत् यथातथा वा भवतु । अस्माकं तु बदरीनाथं अपि द्रष्टव्यं किल ?
Be that as it may. Don’t we have to go to Badrinath?

ते गौरीकुण्डं पद्भ्यां प्रत्यागच्छन्ति । ततः वाहनद्वारा रुद्रप्रयागं यन्ति ।
परस्मिन् दिने बदरीनाथं प्रति पुनःप्रयाणं प्रचलति ।
पथि ज्योतिर्मठं प्राप्नुवन्ति ।

They return to Gowrikund by foot. From there to Rudraprayag by vehicle. Next day, their journey towards Badrinath is resumed. On the way they reach Jyotirmath. (Also called Joshi Math)

पितामहः - शङ्कर , तिष्ठाम अत्र किञ्चित् कालं ,
मया श्रुतं अत्र आदिशङ्करेण
स्थापितं पीठं अस्ति इति ।
चतुर्षु दिक्षु तेन पीठानि स्थापितानि ।
उत्तराम्नाय पीठं अत्रैव अस्ति । अहं तत् द्रष्टुं इच्छामि ।

Shankar, stop here for sometime. I have heard that there is a Peetham established by AdiShankara here. In all the four directions Peethas were established by him. The northern ritualistic Peetha is here.
I want to see that.

आश्रमं दृष्ट्वा ते बदरीनाथ क्षेत्रं प्राप्नुवन्ति ।
तत्र रात्रिं उषित्वा प्रभाते
बदरीनाथं द्रष्टुं गच्छन्ति ।

After seeing the Ashram, they reach Badrinath. After spending the night there, they go to see Badrinath (temple) in the morning.

उमा - तात भवता उक्तं किल अत्र नरनारायणाख्यौ महर्षी
अद्यापि तपः कुर्वन्तौ स्तः इति ।
एवं नारदः मुनिश्च अन्ये इन्द्रादि देवाश्च
बदरीनाथं पूजयन्ति इति ।

Father, did you not say that the two Maharshis Nara and Narayana are doing penance here even today? And also that Narada Muni and the Devas like Indra worship Badrinath?

पितामहः - उमा , पश्यसि वा तं पर्वतं ? यस्य
सानौ बदरीनाथस्य मन्दिरं
अस्ति , सः नारायणः । एतस्य पुरतः एषः
हिमशिखरोपेतः पर्वतः
नरः इत्युच्यते ।

Uma, do you see that mountain at the foot of which Badrinath’s temple is situated? That hill is Narayana. Opposite that, the snow peaked mountain is called Nara.

नारदस्य शिला गर्भगृहस्य अन्तः अस्ति ।
घर्मकाले यदा हिमं न भवति तदा मनुष्यैः पूज्यते बदरीविशालः ।

Narada’s idol is inside the Sanctum Sanctorum of

the temple. In the warm months, when there is no snow, people worship Badri Vishal.

षण्मासे यदा हिमेन आवृतं भवति , तदा देवैः पूज्यते, तदा नरः अत्र न आयाति । केवलं तैलदीपं प्रज्वाल्य नराः गच्छन्ति ।

During the six months when it is covered with snow, the Devas worship (him), people do not come here. They just light a lamp and go.

षण्मासात् अनन्तरं यदा पुनरागमिष्यन्ति तदा अपि सः दीपः ज्वलति ।

When they return after six months, the lamp remains lit.

शङ्करः - वयं तप्तकुण्डे स्नानं कृत्वा पुनरेष्यामः ।

Let us have our bath in the hot water spring and return.

ततः अलकनन्दा तीरं गत्वा शीतलजलेन प्रोक्षणं कृत्वा नारद शिलां दृष्टवन्तः ।

Thereafter they go to the Alakananda river, sprinkle the cold water on themselves and see the Narada rock.

शङ्करः- अस्मात् स्थानात् एव बदरीनाथस शिलां आदिशङ्करः उध्दृतवान् एवं मन्दिरे स्थापितवान् ।

From this spot only Adi Shankara lifted the idol and installed it in the temple

ते साक्षात् मन्दिरं गत्वा बदरीनाथं प्रणम्य निवेदनं कृत्वा परमसन्तुष्टाः प्रतिनिवर्तितवन्तः ।

They visit the temple of Badrinath, pray and worship and return extremely satisfied.

---------------------------------------------------------------------

Lesson-9 Grammar Part-1

संप्रति - now

साधूनां आश्रमः - Hermitage, a place where Saints live, equivalent of a monastery.

न उभयम्- neither , उभयं - both

विश्रान्ति गृहम् - Rest House

गङ्गाकूलः - The banks of the river Ganges. गङ्गातीरः,
गङ्गातटः are also terms which mean the same.

वाजिशकटम् - Cart drawn by Horses

शकटम् - cart

आङ्ग्ल भाषा - The English Language

अवगच्छामि - I understand अवगच्छ् - To understand

बालौ - two children
Note here that even if one of the two is a girl, the masculine form is used. However, if both the children are girls, the corresponding term would be बालिके .

अवलोकयति - looks, sees

शान्तियुक्तम् - Peaceful, serene, calm

ध्यानमग्नाम् - in deep contemplation

आरोहायामः - (they) climb, आरुह् - to climb, ascend

अयुतम् - a word that stands for 10,000

क्लिष्टः - From the root word क्लेशः meaning physically disabled or strained and also, strenuous.
अतिक्लिष्टः - very strenuous

निर्गमद्वारम् - The meaning here is a source from which water sprouts.

कंपामहे , कंपेमहि - shiver from
कंप् - to shiver, shake

कंबलं - blanket ओर्णवस्त्राणि - woolen clothing

चक्षुर्गोचर - visible to the eye
नयनपथं - also means the same

द्रोणी - a valley

इच्छुः - one who desires

कार्वीथी - Motorable road

अनुसृत्य - following

संगम् - to join संगच्छतः - two (rivers) join

अपरिचिता - Unfamiliar, not introduced yet

मरकतश्यामः - Dark Greenish. मरकत is a special stone deep green in colour.

हस्तयुगशतानि - a measure approximately one yard

------------------------------------------------------------------

Lesson-9 Grammar Part-2

प्रधान देवत्रयं - In the Hindu Pantheon, the fundamental deities are three, in charge of creation, protection and destruction respectively, of the universe and its contents. They are known as Brahma, Vishnu and Maheswara (Shiva). This triad is referred to as प्रधान देवत्रयम् .

विराजते - reigns

अन्तर्वाहिनी - subterrain current or flowing inwards

त्रेतायुगः - In the Hindu concept of Time, the earth on which we live, has gone through cyclical aeons which are four in number. They are

कृत , त्रेता , द्वापर and कलि

The cycle of the four spans a period of 43,20,000 human years and they are divided in the ratio of 4,3,2,1. So Kaliyuga, the last will be of duration which is a tenth of the span, or 4,32,000 years or a little less than half a million years.

The current millennium, i.e., the twentyfirst century, is approximately the 5100th year in kaliyuga.

निरन्तरं - Permanent, without a gap in time.

जाज्वल्यमानः - burning prominently

अहर्निशं - Day and Night

अग्निः - Fire

द्रष्टव्यं - worth seeing

जन्मान्तरे - in the course of multitudes of births i.e., among many reincarnations

तपः - penance

अतपत् - did penance

उषित्वा - having stayed

अश्वोपरि - on horseback

बहुविलंबेन- After a long time or after much delay

प्रतिनिवर्तितवती - returned (she)

मरिष्यामि - I will die

एतावता - so (much)

परिदेवनं करोषि - are complaining (you)

सौविध्य युक्ते - with comforts

ईशवीये - means A.D (Anna Domini)

पूजा - worship पूजकः - one who worships
Also means a priest

पूजा पद्धतिः - the ritual code

आदिशङ्करभगवद्पादः - A hallowed saint who lived in the fifth century B.C. Sankara, was responsible for teaching the people, the fundamental concept of Advaita, or principle of non-duality.

कार्पास वस्त्रद्वयं - two cotton clothes

पञ्चविंशतिशत संवत्सरेभ्यः पूर्वं - Two thousand five hundred years ago.

कमण्डलु - an earthen or wooden vessel for keeping water. Saints carry such a vessel with them wherever they go.

जीर्णोद्धारणं - restoration, renewal from

जीर्णः - digested

उद्धारणम् - reinstallation

विग्रहः - image, idol

उध्दृतम् - secured, upheld (past tense)

प्रतिष्ठापनम् - installation (usually of a विग्रहम्)

साधारणः - ordinary

विशेषः - special, the opposite of साधारणः

व्यक्तिः - individual

आनाय्य - having brought

तरु - tree , so तरोरुपरि - on a tree

स्वयंभु - arising on its own without any external cause(s)

अलौकिकी - unworldly, meaning divine or heavenly